International Journal of Multidisciplinary Research and Development 2015; 2(2): 196-198

International Journal of Multidisciplinary Research and Development

IJMRD 2015; 2(2):196-198
www.allsubjectjournal.com
Received: 11-01-2015
Accepted: 08-02-2015
E-ISSN: 2349-4182
P-ISSN: 2349-5979
Impact factor: 3.762

बृजभूषण शर्मा
शोधच्छात्रः J.R.F.)
राजस्थानविश्वविद्यालयः
जयपुरम् (राजस्थानम्) भारत

**Correspondence:**
बृजभूषण शर्मा
शोधच्छात्रः J.R.F.)
राजस्थानविश्वविद्यालयः
जयपुरम् (राजस्थानम्) भारत

# व्याकरणवाग़ीशपेरिसूर्यनारायणशास्त्रिणः

**बृजभूषण शर्मा**

अभिनवनागेशैः प्राच्यनव्यन्यायादिषु अनितरसाधरणपाण्डित्यप्रकर्षवद्भिः मीमांसकमूर्धन्यैः करतलामलकीकृतमहाभाष्यवाक्यपदीपकैयटादिप्रौढग्रन्थैः नानाशास्त्रेषु स्वव्याख्यया प्रकटितसूक्ष्मार्थैः भाट्टरहस्यादिव्याख्यातृभिः ब्रह्मश्रीयुतैः पेरि सूर्यनारायण शास्त्रिवर्यैः कृत्स्नायाः मञ्जूषायाः व्याख्या नागेशभावप्रकाशाख्या विरचिता विदुषामामोदमावहति। एते च श्रीश्रीश्रीशृङ्गगिरिस्वामिपादानामन्तेवासिनः वैयाकरणकुले एव समुत्पन्नाः व्याकरणशास्त्रप्रवचनेनैव कालं यापितवन्तः। एतेभ्यः श्रीशृङ्गेरीजगद्गुरुचरणाः 'व्याकरणवागीशः' इत्युपाधिं दत्तवन्तः। आन्ध्रदेशे महाराष्ट्रदेशे च किं बहुना, सम्पूर्णे भारतदेशे एव, साक्षाद्वा परम्परया वा एतच्छिष्यप्रशिष्यपरम्परैवाद्यापि व्याकरणाध्यापननिरता वर्तते इति सर्वविदितम्।

**श्रीसूर्यनारायणशास्त्रिणां जन्म बाल्यञ्च**

04.08.1910 दिनाङ्के विशाखमण्डलस्थे चोडवरसमीपे पेदनन्दपल्लि अग्रहारे श्रीशास्त्रिणः जन्मालभन्त। श्री पेरि सर्वेश्वरशास्त्रि–सोमिदेवम्मदम्पत्योः प्रियतनूजाः एते सन्मित्रगणमध्ये स्वीयं बाल्यं सानन्दं सस्नेहमयापयन्।

**अध्यापकत्वम्**

विशिष्टगुरुद्वन्द्वपादाब्जसेवनमहिम्ना व्याकरणादीनां नानाशास्त्राणां पारं दृष्ट्वा अध्यापकपदमलंचक्रुः श्रीशास्त्रिणः। पंचाशद्वर्षव्याप्तं सुदीर्घमध्यापनोद्यमं श्रीशास्त्रिणः श्रीसिंहाचलदेवस्थानसंस्कृतपाठशालायां सेवया प्रारभन्त। तत्र वर्षत्रयं बोधनं कृत्वा अनन्तरं 1971 पर्यन्तं श्रीविजयनगर संस्कृतपाठशालायां बोधकाः आसन्। अनन्तरं राजमहेन्द्रनगरस्थश्रीगौतमीविद्यापीठसंस्कृतकलाशालायामपि 1977 पर्यन्तम् अध्यापकपदवीं विभूषयामासुः। ततः परं 1981 वत्सरपर्यन्तं मन्त्रालयक्षेत्रे श्रीराघवेन्द्रस्वामिमठसम्बन्धिनि श्रीगुरुसार्वभौमविद्यापीठे अध्यापकाध्यापकपदव्यामासन्। तदुत्तरकाले 1984 वर्षं यावत् श्रीतिरुमलतिरुपतिदेवस्थानस्य प्रणालीमनुसृत्य वर्षचतुष्टयकालम् उन्नतशास्त्राध्यापनकार्यक्रमं निरवहन्। पंचाशद्वर्षव्याप्तेऽस्मिन् अध्यापनकार्ये सर्वत्राणि व्याकरणप्राचार्यत्वमेव तैरलमकारि।

**गुरवो बहवस्सन्ति शिष्यवित्तापहारकाः।**
**शिष्यचित्तापहारी तु गुरुः परमदुर्लभः।।**

इति महतां वचनस्योत्तमोदाहरणभूताः श्रीशास्त्रिणः।

**श्रीशास्त्रिणां रचनाः**

1. षड्दर्शनमुलु। (आन्ध्रभाषायां षड्दर्शनपरिचयः)
2. वृत्तिविचारमु। (आन्ध्रभाषायां – कृत्तद्धितादीनां विचारः।)
3. परमार्थसारमु। (आन्ध्रभाषायां वेदान्ते)
4. तत्त्वदर्शिनी। (वैयाकरणभूषणसारस्य संस्कृतव्याख्या)
5. खण्डदेवभावप्रकाशः (पूर्वमीमांसाग्रन्थः – संस्कृते)
6. नागेशभावप्रकाशः (संस्कृते – इदं नागेशलघुमंजूषायाः व्याख्यानम्)

विशिष्टान्त्येतानि रचनानि विद्वज्जनमनोरंजकानि, अतिगहनशास्त्रमर्मप्रदर्शकानि च। एते "व्याकरणाचार्यः" "दर्शनाचार्यः" "उपनिषदर्थवाचस्पतिः" "महामहोपाध्यायः" "व्याकरणवागीशः" इत्यादिभिर्बिरुदैः समलंकृताः।

1. राष्ट्रियपुरस्कारः (1969)।
2. भारतराष्ट्रपतिपुरस्कारः (1981)।
3. महामहोपाध्यायः (1989)।
4. व्याकरणालंकारः (1979)।
5. राजलक्ष्मीपुरस्कारः (1981) इति पुरस्कारैस्समभ्यर्चिताः। तदानीन्तनभारतोपराष्ट्रपतयः श्रीशंकरदयालशर्माणः 1992 तमे वर्षे सर्वजनसमक्षं श्रीशास्त्रिणां पादयोः साष्टांगप्रणाममाचरितवन्तः। यस्य कस्यापि संस्कृतपण्डितस्य स्वप्नेऽप्यलभ्योऽयं सम्मानविशेषः सर्वमिदं वाण्याः प्रसादविलसनम्।

एभिः मञ्जूषाव्याख्याने प्रसंगात् गदाधरभट्टाचार्याणां, खण्डदेवादीनां च मतानि पदे पदे परामृष्टानि, बहुषु स्थलेषु निराकृतानि च। वस्तुतः पुनर्गदाधरः खण्डदेवो वा प्रादुर्भूय वक्तुमुद्यतोऽपि एतैराक्षिप्तानां समाधानं न वक्तुं समर्थ इत्येवास्माकमाशयः। नेयमतिशयोक्तिः, अपि तु वस्तुस्वरूपकथनमेव। भाट्टरहस्यव्याख्याव्याजेन मीमांसकमतमेतैर्बहुत्र दूरीकृतम्। महाभाष्यविरुद्धस्थलेषु तत्तन्मतखण्डनमेव श्लाघ्यमिति एतेषामाशयः। एतेषां सविधे पठनाभावेऽपि एतेषां ग्रन्थनिरीक्षणेन बहवो विषया अस्माभिरवगताः। अत एतेऽपि व्याकरणविषयेऽस्माकं आचार्यदेशीया एवेति सविनयमावेदये।

श्रीशास्त्रिचरणानाम् अनितरसाधारणी विवेचनशैली प्रसिद्धैव। तासु द्वित्राणि स्थलानि विदूवन्मनोरञ्जनार्थं प्रदर्शयामः। विप्राय ओदनम् – इत्यादिषु तादर्थ्ये चतुर्थी इति सम्मतम्। तादर्थ्यं नाम उपकार्योपकारकभावः सम्बन्धः। अत्र तादर्थ्यस्यापि सम्बन्धत्वेन विवक्षा यदि तदा षष्ठ्येव भवति। गुरोः इदम् = गुर्वर्थम् इत्यादिषु यथा। अत्र तादर्थ्यशब्दस्य – तस्मै इदं

तदर्थम्। तस्य भावः तादर्थ्यम् – इति केचन वर्णयन्ति। तत्तु सिद्धान्तरीत्या न सर्वत्र सङ्गच्छते। यतः अर्थशब्दः निवृत्तिवचनोऽपि प्रयोगे दृश्यते। तादृशार्थमादायापि निर्वाहः कर्तव्य आपतति। "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इति कोशादपि निवृत्त्यर्थकत्वं व्यक्तम्। "वसेः अस्यर्थस्य प्रतिषेधः" इति वार्त्तिके प्रयुक्तोऽर्थशब्दः "अर्थशब्दो निवृत्तिवाची" इति कैयटैर्व्याख्यातः। अत एव "मशकार्थो धूमः" इत्यत्र मशकनिवृत्तिरूपप्रयोजनाय धूम इति तात्पर्यं वर्ण्यते। एवं 'मृगेभ्यो वागुरा' इत्यत्र मृगाणां बन्धनीकरणार्थमिति अर्थः। अतश्च लक्ष्यानुसारेण अपकार्यापकारकभावेऽपि अर्थशब्दो वर्तते – इति कैयटाशयः।

एतत्परामर्शसमये श्रीशास्त्रिवर्यैरेवमुपपादितम् – लोके कुत्रापि अर्थशब्दस्य अपकारार्थकत्वं न दृष्टम्। 'भक्षितेऽपि लशुने न शान्तो व्याधिः' इति न्यायेन कथञ्चिदेतदर्थकत्वे 'मशकार्थो धूमः' इत्यादिषु स्वीकृतेऽपि 'मृगेभ्यो वागुरा' इत्यादिषु अन्वयानुपपत्त्या सर्वैरपि लक्षणा स्वीकार्या। तेनैव लक्षणास्वीकरणेन 'मशकेभ्यः' इत्यत्रापि लाक्षणिको निर्वाहः सम्भवति। तदर्थम् अप्रसिद्धार्थस्यात्राश्रयणं न समञ्जसम्। नागेशैरपि उपकार्योपकारकभावसम्बन्ध एव तत्र प्रतिपादितः। अत एव "वसेरश्यर्थस्य प्रतिषेधः" इति वार्त्तिकस्यस्थार्थशब्दस्य अशिनिवृत्तिमर्थत्वेन वर्णयित्वा शाकपार्थिवादित्वात् निवृत्तिशब्दस्य लोपः – इति व्याख्यातृभिरुक्तम्। कैयटैरेव स्वयं प्रथमत उक्ते व्याख्यानेऽस्वारस्यं मन्वानैः – "शेतेरर्थः श्यर्थ, न श्यर्थः अश्यर्थः" इति व्याख्यानान्तरं प्रदर्शितम्। प्रयोजननिवृत्तिरूपार्थद्वयस्यापि तन्त्रेण वार्त्तिकहृद्रतत्वेन वर्णनमपि न सङ्गच्छते। भाट्टरहस्ये "उपकारापकारसाधारणं तादर्थ्यं लक्षणया चतुर्थ्यर्थः" इति समन्वयप्रकारश्च न समीचीनः।

एवं व्युत्पत्तिवादे "स एव अर्थः = प्रयोजनं यस्य सः तदर्थः। तस्य भावः तादर्थ्यम्" इति भाष्यादिविरुद्धा बहुव्रीहिसमाश्रयणरीतिः या प्रदर्शिता साऽपि न प्रामाणिकी। उपकार्योपकारकभावसम्बन्धं पुरस्कृत्य अर्थशब्दस्य विवेचने 'दुःखाय पापम्' इत्यपि प्रयोगः साधुः स्यात् – इति भट्टाचार्याणामाशयः। प्रयोजनत्वं किं जन्यत्वम्? उत जन्यतया इच्छाविषयत्वम्? इति विकल्प्य बहुधा आक्षेपाः कृताः। "दुःखाय पापम्' स्वर्गाय पुण्यम्" इत्यादिप्रयोगाणां साधुत्वे, 'पक्तुं व्रजति' इतिवत् 'पाकाय व्रजति' इत्यस्यापि साधुत्वसम्पादनार्थं "तुमर्थाच्च भाववचनात्" इति सूत्रप्रणयनवैयर्थ्यमपि तैः आपादितम्।

नागेशोपाध्यायैः पक्षोऽयं प्रतिक्षिप्तः। "सुखाय पुण्यम्, नरकाय पापम्" इत्याद्याः प्रयोगाः साधव एव। "यागाय याति" इत्यादौ तुमर्थघञा तादर्थ्यस्योक्तत्वात् "उक्तार्थानामप्रयोगः" इति न्यायेन पाकपदात् चतुर्थ्याः अप्राप्तौ "तुमर्थाच्च भाववचनात्" इति सूत्रमारब्धम्। भाष्ये तादर्थ्यशब्दे "तस्मै इदम् तदर्थम्, तस्य इदम् तदर्थम्" इति चतुर्थो – षष्ठ्यौ एव विग्रहवाक्ये प्रदर्शिते। तौ च तत्पुरुषसमासौ। भट्टाचार्योक्तरीत्या बहुव्रीहिसमासो भाष्ये कुत्रापि न प्रदर्शितः। किञ्च शब्दमर्यादया भट्टाचार्योक्तोऽर्थोऽत्र न लभ्येत। क्रियार्थोपपदकघञन्तस्य प्रयोगे चतुर्थीविधानार्थं "तुमर्थाच्च" इति सूत्रमारब्धम्। एवं विषयभेदस्य विद्यमानत्वात् तत्सूत्रमपि न निर्विषयम्। एवं रीत्या तादर्थ्यचतुर्थीविषये भाष्यकैयटनागेशादिभाववर्णनपूर्वकं श्रीशास्त्रिचरणैः सुबर्थवादे यत्साधितम्, तदतीव विदुषां प्रमोदायेति भाव्यम्। अथ कारकशब्दार्थपरिष्कारविषये किञ्चिदुच्यते। कृधातोः कर्तरिण्वुलि निष्पन्नः कारकशब्दः। तेन "करोति = क्रियां निर्वर्तयति" इति कारकशब्दव्युत्पत्तिः। कारकत्वं च – क्रियाजननशक्तिः। 'अनभिहिते' इति सूत्रे – 'गुणाः साधनम्' इति भाष्यम्। साधनस्य परतन्त्रत्वेन एवमभिधानम्। गुणत्वेन एव पारतन्त्र्यात् शक्तिरेवात्र भाष्ये अभिहिता। 'सप्तमीपञ्चम्यौ कारकमध्ये' इति सूत्रभाष्ये तु स्पष्टमेव "शक्तिः कारकम्" इत्यभिहितम्। "शक्तिः कारकम्" इति, "क्रियाजनकं कारकम्" इति च सिद्धान्ते पक्षद्वयं वर्तते। उभयोरपि अदूरविप्रकर्षेण तुल्यार्थकत्वमेव। अत एव "कारकं = क्रियाजनकत्वशक्तिः" इति शेखरकारैः विवृतम्। शक्तिः सामर्थ्यम् इत्यनर्थान्तरम्। अत एव भर्तृहरिभिः–

**स्वाश्रये समवेतानां तद्वदेवश्रयान्तरे।**
**क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः।।**

इति विवृतम्। 'कारके' इति सूत्रे "साधकं निर्वर्तकं कारकसंज्ञं भवतीति वक्तव्यम्" इति वार्तिकस्य व्याख्यानावसरे "अन्वर्थसंज्ञा यथा विज्ञायेत – करोतीति कारकम्" इति, "एवं तर्हि सामान्यभूता क्रिया वर्तते, तस्याः निर्वर्तकं कारकम्" इति च भाष्यमत्रावधेयम्। अत्र सर्वत्र साक्षात् क्रियानिर्वर्तनस्य विवक्षा। तेन 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छति' इत्यत्र ब्राह्मणरूपार्थस्य पृच्छतिक्रियायां साक्षात् सम्बन्धाभावात् न षष्ट्यन्तस्य तस्य कारकत्वम्। पुत्रस्यैव क्रियासम्बन्धः। ब्राह्मणस्तु अन्यथासिद्धः। "काष्ठेः स्थाल्यां तण्डुलान् पचति" इति प्रयोगे सन्निहितस्य काष्ठादेरेव करणत्वम्, न अरण्यस्थादेः। एवं चुल्ल्याम् आरोपिताया एवं स्थाल्या अधिकरणत्वम्, न कुलालगृहे विद्यमानस्य। अत्रोपात्तस्यैव तण्डुलादेः कर्मत्वम्, न तु विपण्यादिस्थस्य। एतत् सर्वं प्रकरणात् लभ्यते। एवञ्च तत्तच्छक्त्याविष्टस्यैव क्रियाजनकत्वम् – इति सिद्धस्य द्रव्यस्य स्वरूपतः क्रियाजनकत्वं न – इत्यादिकमपि अवधेयम्। काष्ठादीनां तत्तत्कारकत्वेऽपि शक्त्याविष्टस्यैव कार्योत्पादनदर्शनात् शक्त्यावेशो नान्तरीयकः। न केवलमत्र, सर्वत्राप्येवमेव। अत एव "प्राप्ताप्राप्तविवेकेन शक्तिः साधनम्" इति पूर्वैरुक्तम्, एवं "परोक्षे लिट्" अति सूत्रेऽपि "गुणसमुदायः साधनम्" इति भाष्यम्। एतत् सर्वं मञ्जूषायां स्पष्टम्।

अत्र "शक्तिः कारकम्" इति पक्षः न सङ्गच्छते, क्वचित् शक्तिमतो द्रव्यस्यैव कारकशब्दव्यवहारो भाष्ये दृष्टः। यथा – "सार्वधातुके यक्" इत्यत्र भाष्ये – "द्रव्यं क्रियाभिनिर्वृत्तिं प्रति साधनत्वमुपैति" इति द्रव्यस्य साधनत्वमुक्तम्। "अतिशायने तमबिष्ठनौ" इत्यत्र तु भाष्ये "साधनं नैव द्रव्यम्" इत्यभिहितम्। अत्र उभयोर्भाष्ययोर्विरोधः स्पष्ट एव। अतः "क्वचित् शक्त्याविष्टस्यापि साधनत्वेन व्यवहारः, शक्तिशक्तिमतोरभेदस्यापि सत्त्वात्। 'शक्त्या करोति' इत्यादौ शक्तेरपि द्रव्यायमाणतया शक्त्यन्तरयोगः इति श्रीनागेशैरभिहितम्। अत्र श्रीशास्त्रिचरणानां व्याख्या सूक्ष्मेक्षिकया विद्वद्भिरनुसन्धेयः। "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्योक्तेः अत्र शक्तिशब्दोत्तरकरणशक्त्यभिधायकतृतीयायाः प्रयोगः साधुरेव। अत एव विभक्त्यर्थकाव्ययेन अव्ययीभावसमासः संगच्छते।

सर्वेषां च कारकाणां स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियायाः निष्पादकत्वम्। विक्लेदनक्रियाजनकत्वेन कर्मणः, ज्वलनसम्बन्धपरिकल्पनरूपक्रियानिष्पादकत्वे काष्ठादीनां, पात्रस्थतण्डुलादेः चुल्ल्या अधो वा पतनाभावसम्पादनद्वारा आधारणक्रियानिर्वर्तनद्वारा स्थाल्याः इत्याद्याकारेण तत्तदवान्तरक्रियानिष्पादनेन सर्वेषां कारकाणां प्रधानक्रियोपयोगित्वमवगन्तव्यम्।

"ग्रामे वसते ब्राह्मणाय गां ददाति" इत्यत्र दानकाले देवदत्तस्य प्रतिग्रहीतुरसान्निध्येऽपि दातृबुद्धिस्थत्वेन दातृज्ञानपूर्वकालत्वेन प्रतिपत्तिः भवति। तावतैव दानरूपायाः क्रियायाः निष्पत्तेः। एवं 'घटं करोति' इति प्रयोगोऽपि साधुरेव। भाविनां संज्ञामाश्रित्यापि लोके व्यवहारस्य दृष्टत्वात्। तादृशं वस्तु कुलालो निर्माति – यस्य निर्मितस्य घट इति व्यवहारो भविष्यति – इति पर्यन्तं तत्रार्थस्य विवक्षितत्वात्। स्पष्टमेवं भाविनी संज्ञामाश्रित्यापि व्यवहारः साधुरिति "वृद्धिरादैच्" सूत्रभाष्ये। तेन अनुत्पन्ने घटे घटव्यवहारोऽसाधुः कारकव्यापारवैयर्थ्यप्रसङ्गात् इति केषाञ्चिदाक्षेपो भाष्यविरुद्धः। नापि अनुत्पन्ने घटे घटव्यवहारो गौणः, मुख्यत्वात्।

एवं भाष्यादिपरामर्शेन वैयाकरणैः निरूपणात् "क्रियान्वयित्वं कारकत्वम्", "क्रियान्वितप्रत्यययार्थान्वयित्वं कारकत्वम्" इत्याद्याः पक्षा असंगताः इति अत्र श्रीशास्त्रिचरणैः विपुलं प्रतिपादितम्। सुपां द्योतकतापक्ष एवं भाष्यतात्पर्यम् इति विपुलमुपपादितमेतैः। कर्तृत्वपरिष्कारः, स्वातन्त्र्यपरिष्कारः, करणत्वपरिष्कारः, सम्प्रदानत्वपरिष्कारः इत्येतादृशा विषयाः विदुषां मोदावहाः, विचारवूर्णाः। अचुम्बिताः पूर्वैरीदृशाः परिष्काराः ग्रन्थेऽस्मिन् पदे–पदे सुलभाः।

"सहयुक्तेऽप्रधाने" इति सूत्रमधिकृत्य प्रवर्तिता व्याख्या सर्वांगपरिपूर्णा। 'मुख्यत्वमेव प्रधानत्वम्' इति रसगंगाधरकारमतं विमृश्य, तत्र अनुपपत्तीः प्रदर्श्य वैयाकरणसिद्धान्तः सुष्ठु प्रतिपादितः। "सहयुक्तेऽप्रधाने" इति सूत्रपाठं विपर्यासेन नञ्रहितप्रधानशब्दपाठेन केचित् कोलाहलमकुर्वन्।

"उद्यानपत्रिका" इति बहोः कालात् पूर्वं प्रवर्तितायां गैर्वाणीमासपत्रिकायां सूत्रमेतदधिकृत्य विद्वद्भिः बहुधा विचारः प्रवर्तितः। द्रविडभाषाव्याकरणमूलग्रन्थे "तोल् काप्पियम्" इति ग्रन्थेऽपि 'प्रधाने' इति पाणिनिपाठमनुसृत्यैव विवेचनं कृतमित्यपि सप्रमाणं विद्वद्भिः तत्र प्रदर्शितम्। व्याकरणसम्बन्धिनोऽनेके विषयाः अद्यापि विद्वद्भिः विवादरूपेण विमृश्यन्ते एव। परं तु श्रीशास्त्रिवर्याः एवं सूत्र–वार्तिकभाष्य–वाक्यपदीयादिविरुद्धं किमपि न प्रदर्शयन्ति, नांगीकुर्वन्ति च। सर्वत्र स्वोक्तार्थे भाष्यादिकं प्रमाणत्वेनोपस्थापयन्ति। एषां जिह्वाग्रे भाष्यभारती नर्तनं करोति। प्रामाणिकानामेतेषां परिश्रमः विदुषां व्याकरणाध्येतॄणां विमर्शकानां विमर्शकानां च अक्षयो निधिः। अस्माभिरेतेषां व्याख्यामनुसृत्यैव शिक्ष्येभ्यः पाठाः प्रवर्तिता इति सामोदं ब्रूमः।

ऐतेषां वैदुष्येण प्रभाविताः भूत्वा राष्ट्रिय–संस्कृतविद्यापीठम्, तिरुपतिः इति विश्वविद्यालयस्य कुलपतयः अपि ऐतेषां भूरि भूरि प्रशंसाः कृतवन्तः।

**वन्दे तं सूर्यनारायणगुरुचरणं वेदवेदान्ततत्त्व–**
**वेत्तारं नौमि तस्य प्रियभूवमधुना शोभनामान्ध्रभूमिम्।**
**वन्दे तां कर्मभूमिं च विजयनगरीं भारतीभाग्यधात्रीं**
**शिष्याणां नौमि तेषामपि च सुमहती जाह्नवीपुण्यधाराम्।।**
**शास्त्राणामुदयाय यैरनुदिनं नीतं निजं जीवनम्**
**भारत्याश्चरणाब्जयुग्मसविधे सेवा च सम्पादिता।**
**ते वै व्याकरणाब्धिमन्थनचणाः मन्थाचलाश्चंचलाः**
**शब्दब्रह्मलयाः नमस्यचरणाः श्रीसूर्यनारायणाः।।**

**सहायकग्रन्थसूची**


1. भूषणसारतत्त्वप्रकाशिका अष्टाध्यायीकाशिकावृत्तिः, चौखम्भासंस्कृतप्रतिष्ठान, दिल्ली।
2. काशिकावृत्तिन्यासपदमञ्जरीयुता–षट् भागाः प्राच्यभारती प्रकाशनम्, वाराणसी, 1956–66।
3. काशिकावृत्तिसिद्धान्तकौमुद्योः तुलनात्मकमध्ययनम्, डॉ. मोहनदत्त शर्मा, पूना, 1974।
4. खण्डदेवभाट्टरहस्यम् – विजयनगरम् (आ.प्र)
5. प्रक्रियाकौमुदी (प्र.कौ.), के.पि. त्रिवेदिना सम्पादिता, मुम्बई, 1925।
6. प्रौढमनोरमा, श्रीभट्टोजिदीक्षितः, चौखम्भा कृष्णदास अकादमी, वाराणसी, संस्करणः पुनर्मुद्रित, वि.सं.2064ः
7. प्रौढमनोरमा शब्दरत्न–भैरवी–भावप्रकाशसरलोपेता, चौखम्भा, वाराणसी।
8. नागेशभाव प्रकाशः (ना.भा.प्र.) लघुमञ्जूषाव्याख्या धात्वर्थमारभ्यकृदर्थान्ता, विजयनगरम्, आ.प्र. 1970
9. मध्यसिद्धान्तकौमुदी 'लक्ष्मी'– मुद्रिका' संस्कृत–हिन्दी व्याख्योपेता सरल सुबोध परिशिष्टादि सहिताच, चौखंभा ओरियन्टालिया, दिल्ली, 110007 (भारत)
10. महाभाष्यम् (म.भा.) भारतीयाद्यिशासनसंरक्षकतायां प्रकाशितम् भागत्रयात्मकम्, मोतीलाल बनारसीदास, 1967।
11. लघुशब्देन्दुशेखरः नागेशभट्टः चौखम्भा पब्लिशर्स, वाराणसी, संस्करण 2004।
12. शब्दकौस्तुभः प्रथमभागः, चौखम्भा, 1929।
13. शब्दकौस्तुभः, द्वितीयभागः, चौखम्भा, 1929।
14. सिद्धान्तकौमुदी तत्त्वबोधिन्या सह, (सि.कौ.त.) निर्णयसागरप्रकाशनम्, मुम्बई, 1936
15. सिद्धान्तकौमुदी, बालमनोरमतत्त्वबोधिनीयुता (सि.कौ.बा.त.) मोतीलाल बनारसीदास, देहली, 1964।
16. संस्कृत व्याकरण का इतिहास, युधिष्ठर मीमांसक, प्र.सं. 2007 (संवत्)।
17. संस्कृत व्याकरण का इतिहास, युधिष्ठर मीमांसक, द्वि.सं. 2020 (संवत्)।